MSS No. 130 Subject Religion

Name of MSS Kumāra Sambhava tikā कुमारसम्भव

Author Kalidasa कालिदास

Period Not available Folios 16 (001 – 016)

Script Sanskrit Source Prithipal Singh

Missing Folios Incomplete

130

130

कु.मा. ॐश्रीगणेशायनमः नगाधिराजः हिमस्थितिः उत्तरस्यांदिशिऽस्तिभवतिनगानांपर्वतानांमध्येअधि
टी. राजातीतिशोभतीतिसः किंभूतः नगाधिराजः देवतात्मादेवतैवात्माशरीरःयस्यसः पुनःकिंभूतः नगाधि॰
१ राजः हिमालयेनामनाम्नाहिमाचलः पुनःकिंलक्षणः नगाधिराजः स्थितः निश्चलीभूतः किंकृत्वातोयनिधी
विगाह्यसमुद्रौविलोक्यकिंभूतौतोयनिधीपूर्वापरौपूर्वश्चापरश्चपूर्वापरौकइवपृथिव्यामेदिन्याःमानदंडइव १

ॐश्रीगणेशायनमः अस्त्युत्तरस्यांदिशिदेवतात्माहिमालयोनामनगाधिराजः पू
र्वापरौतोयनिधीवगाह्यस्थितः पृथिव्याइवमानदंडः १ यंसर्वशैलाःपरिकल्प्यवत्सं
मेरौस्थितेदोग्धरिदोहदक्षे भास्वंतिरत्नानिमहौषधीश्चपृथूपदिष्टांदुदुहुर्धरित्रीं २

यमितिकः नगाधिराजः सर्वशैलाः सर्वपर्वताः धरित्रीमेदिनीदुदुहुः किंकृत्वायंनगाधिराजंवत्संपरिकल्प्यगो
स्तनेरूपकाणिदुदुहुः रत्नानिमणीन्चपुनः महौषधीः दिव्यौषधीः कस्मिन्सतिमेरौपर्वतेदोग्धरिस्थितेसति
किंभूतेमेरौदोहदक्षेदोहेदक्षः कृपालस्तस्मिन्किंभूतानिरत्नानिभास्वंतिदीप्तानिकिंभूतांधरित्रीपृथूपदिष्टांपृथु १
नाराज्ञाउपदिष्टाउपदिशितातां २ ॥

अनंतेति यस्य हिमालयस्य हिमं तुषारं सौभाग्यविलोपि न जातं ऐश्वर्यनाशि न भूतं किंभूतस्य यस्य अनंतरत्नप्रभव
स्य अनंतान्येकानि रत्नानि मणीन् प्रभवतीति अनंतरत्नप्रभवस्य तस्य अनंतानि रत्नानि प्रभूयंते उत्पद्यंते अस्मा।
त्तस्य ही नि निश्चयेन गुणसन्निपाते गुणसमूहे एकः दोषः निमज्जति बूडति दूरी भवति केषु क इव इंदोः कि
रणेषु चंद्रस्य रश्मिषु अंकः कलंक इव २ यो हिमालयः धातुमत्तां त्रोट अप्सरो विभ्रममंडनानां अप्सरसां दे

अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं एको हि दोषो गुणसन्निपाते निमज्ज
तीन्दोः किरणेष्विवांकः ३ यश्चाप्सरोविभ्रममंडनानां संपादयित्रीं शिखरैर्बिभर्ति बलाह
कच्छेदविभक्तरागामकालसंध्यामिव धातुमत्तां ४

वांगनानां विभ्रमविलासस्तस्य मंडनाः शृंगारास्तेषां संपादयित्रीं धातुमत्तां का इव अकालसंध्यामिव अकालीन
संध्यामिव किंभूतामकालसंध्यां बलाहकच्छेदविभक्तरागां बलाहकस्य मेघस्य छेदा निखंडानि तैर्विभक्तः भेदितः
रागः रंगः यस्या सा तां धातुमत्तां भावं शिखरैर्बिभर्ति मूर्ध्नि दधाति किंभूतां धातुमत्ताम् ४ श्रीरामचंद्राय नमः
श्रीसरस्वत्यै नमः ॥

कुमा० आमेखलमिति सिद्धाः देवाः यस्य हिमालयस्य शृंगाणि सानूनि आश्रयंते सेवंते किंभूताः सिद्धाः वृष्टिभिर्वर्षैः उ
टी० द्वेजिताः कंपिताः किं कृत्वा घनानां छायां मेघानां प्रतिबिंबं निषेव्य संसेव्य किंभूतानां घनानां आमेखलं मध्यपर्यंत
२ संचरितां प्रचरतां किंभूतां छायां अधः सानुगतां अधः सानूनि शृंगाणि गच्छतीति सा तां किंभूतानि शृंगाणि आतप
वंति आतपविद्यते येषु इति आतपवंति ५ किराताः भिल्लाः यस्मिन् हिमालये केसरिणां मार्गं सिंहानां पंथानं विंदं

आमेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य उद्वेजिता वृष्टिभिराश्रयंते शृंगाणि य
स्यातपवंति सिद्धाः ५ पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानां विंदंति मार्गं न
खरंध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ६

ति किं कृत्वापि पदं चरणं अदृष्ट्वापि अप्रेक्ष्यापि कैर्ज्ञानंति
मुक्ताफलैः मुक्तकैः किंभूतैः मुक्ताफलैः नखरंध्रमुक्तैः नखानां कराग्राणां रंध्राणि छिद्राणि तेभ्यो मुक्तानि पतितानि
तैः किंभूतानां केसरिणां हतद्विपानां हताः हिंसिताः द्विपाः हस्तिनः यैस्ते तेषां किंभूतं पदं तुषारस्रुतिधौतरक्तं तु
षारस्य हिमस्य स्रुतिः स्रवणं तेन धौतं प्रक्षालितं रक्तं रुधिरं यस्मात् तत् ६ न्यस्तेति भूर्जेत्वचः भूर्जवृक्षत्वचः पत्रयासि २

लयेविद्याधरसुंदरीणांविद्याधरस्त्रीणांअनंगलेखक्रिययाअनंगस्यकामदेवस्यलेखंलेखिनंतस्याक्रिययाउप
भोगंक्रीडतांव्रजतिगच्छति किंभूताः भूर्जत्वचः धातुरसेनधातूनांगैरिकादीनांरसेऽंगेनन्यस्ताक्षराः न्यस्ताः वि
हिताः अक्षराः वर्णाः यासुताः पुनः किंभूताः भूर्जत्वचः कुंजरः बिंदुशोणाः कुंजरस्यगजस्यबिंदवः मदबिंदु
वस्तद्वच्छोणाः रक्ताः ७ यइति योहिमालयः इच्छतीव किंकर्तुंकिन्नराणांस्थानप्रदायित्वंउपगंतुंकिंपुरुषा

न्यस्ताक्षराधातुरसेनयत्रभूर्जत्वचः कुंजरबिंदुशोणाः व्रजंतिविद्याधरसुंदरीणामनंगलेखक्रिययो
पभोगं ७ यः पूरयन्कीचकरंध्रभागान्दरीमुखोत्थेनसमीरणेन उद्गास्यतामिच्छतिकिन्नराणांस्थान
प्रदायित्वमिवोपगंतुं ८

णांस्थानप्रदायितोभवेयः संगीतेस्वरंददातीतितस्यभावंप्राप्नुपगंतुंकिंभूतानांकिन्नराणांउद्गास्यतांसंगीयमाना
नांकिंकुर्वन्सन्समीरणेनवायुनाकीचकरंध्रभागान्सछिद्रवेणुरंध्रान्पूरयन्सन्दरीमुखोत्थेनदरीणांकं
दराणांमुखात् आननात्उत्थःउत्पन्नस्तेन ८॥

कु॰मा॰ कपोलेति यत्र यस्मिन् हिमालये शारलद्रुमाणां शरलवृक्षाणां गंधः सानूनि शृंगाणि सुरभीकरोति सुगंधीक
टी॰ रोति किंभूतः गंधः स्रुतक्षीरतया स्रुतः द्रवितः क्षीरः रसः स एव स्वभावः तया प्रसूतः उत्पन्नः किंभूतानां शारलद्रुमा
३ णां करिभिर्विघट्टितानां गजैः रुद्धे जितानां किंकर्तुं कपोलकंडूं विनेतुं कपोलयोः गंडयोः याः कंडूस्ताः दूरीकर्तुं ९

कपोलकंडूः करिभिर्विनेतुं विघट्टितानां शारलद्रुमाणां यत्र स्रुतक्षीरतया प्रसूतः सानूनि गं
धः सुरभीकरोति ९ वनेचराणां वनितासखानां दरीगृहोत्संगनिषक्तभासः भवंति यत्रौष
धयः रजन्यामतैलपूर्णाः सुरतप्रदीपाः १०

यत्र यस्मिन् हिमालये औषधयः दिव्यौषधयः वनेचराणां किन्नरादीनां रजन्यां रात्रौ सुरते प्रदीपाः सुरतस्य सं
भोगस्य प्रदीपाः दीपाः भवंति संति किंभूता सुरतप्रदीपाः अतैलपूराः तैलं विना पूर्णाः किंभूताः औषधयः द
रीगृहोत्संगनिषक्तभासः दर्यः कंदरा एव गृहाणि प्रसादानि तेषां उत्संगानि शृंगानि तेषु निषक्ता लग्ना भा
कांतिर्यासां ताः किंभूतानां वनेचराणां वनितासखानां वनिताः स्त्रिय एव सखायः मित्राणि येषां तेषां १० ॥ ३

यत्रयस्मिन्हिमालयेअश्वमुख्यःकिन्नर्यःमार्गेयथिमंदांगतिंमंदाभिमंदांगतिंनभिंदंतिनमुंचंति
किंभूताःअश्वमुख्यःनद्वेदश्रोणिपयोधरार्ताःदुर्वहाःश्रोण्यःनितंबाःपुनःपयोधराःस्तनानितैरार्ता
पीडिताःकिंभूतेमार्गेशिलीभूतहिमेशिलीभूतंपाषाणीभूतंहिमंतुषारंयस्मिन्सतस्मिन्पुनःकिंभूतेमा
र्गेअंगुलिपार्ष्णिभागानंगुलीनांपदांगुलीनांपार्ष्णिभागास्तानुद्वेजतिपीडयति ११ योहिमालयःदिवाक

उद्वेजयत्यंगुलिपार्ष्णिभागान्मार्गेशिलीभूतहिमेपियत्र नद्वेदश्रोणिपयोधरार्ताभिंदंति
मंदांगतिमश्वमुख्यः ११ दिवाकराद्रक्षतियोगुहासुलीनंदिवाभीतमिवांधकारं क्षुद्रेपि
नूनंशरणंप्रपन्नेममत्वमुच्चैःशिरसांसतीव १२

रात्सूर्यात्अंधकारंध्वांतंरक्षतित्रायतिकिंभूतंअंधकारंगुहासुकंदरीषुलीनंगुप्तंकिमिवदिवाभीत
मिवदिनेत्रस्तमिवनूनमितिनिश्चयेनउच्चैःशिरसांसाधूनांक्षुद्रेपिनीचेपिममत्वममस्तिकस्मिन्निवसतीव
साधाविवकिंभूतेक्षुद्रेशरणंप्रपन्नेनम्रीभूतेयोनीचोपिश्रेष्ठानांशरणंप्राप्नोतितेषांश्रेष्ठाःपितस्यशरणागत

कुमारसंभवटीका ८

चमर्यः गावः यस्य हिमालयस्य गिरिराजशब्दं गिरिपतिस्तवनं अर्थैः युक्तं सार्थकं कुर्वंति कैः वालव्यजनैः वाला
नां पुच्छकेशानां व्यजनानि चामराः तैः किंभूतैः वालव्यजनैः इतस्ततः लांगूलविक्षेपविसर्पिशोभैः लांगूलस्य पुच्छ
स्य विक्षेपं चालनं तेन विसर्पिण्यः शोभाः कांतयः येषां तैः पुनः किंभूतैः वालव्यजनैः चांद्रमरीचिगौरैः चांद्राः चा

लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चांद्रमरीचिगौरैः यस्यार्थयुक्तं गिरिराज
शब्दं कुर्वंति वालव्यजनैश्चमर्यः १३ यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किं
पुरुषांगनानां दरीगृहद्वारविलंबिबिंबास्तिरस्करिण्यो जलदा भवंति १४ ॥

द्रमसः मरीचयः किरणास्तद्वद्गौराः उज्ज्वलास्तैः १३ यत्र यस्मिन् हिमालये जलदाः तोयदाः किंपुरुषांगनानां किं
नरीणां तिरस्करिण्यः लज्जाः विधन्यः भवंति संति किंभूताः जलदाः यदृच्छया स्वेच्छया दरीगृहद्वारविलंबिनः विलंबिबिं
बाः दर्यः गुहा एव गृहाणि तेषां द्वाराणि तेषु विलंबिनः लग्नाः बिंबाः आकाराः यासां ताः किंभूतानां किंपुरुषांगनानां
अंशुकाक्षेपविलज्जितानां अंशुकानां वस्त्राणां आक्षेपं दूरीभवनं तेन विलज्जिताः लज्जां प्राप्तास्तासां १४ ॥ ॥ ४

किरातैः भिल्लैः यद्वायुः यस्य हिमालयस्य पवनः आसेव्यते संभजते किंभूतो वायुः भागीरथीनिर्झरशीकराणां
भागीरथ्याः गंगायाः निर्झरास्तेषां शीकराः अंबुकणास्तेषां वोढा दधानः पुनः किंभूतः वायुः मुहुः वारंवारं कंपि
तदेवदारुः कंपिताः तर्जिताः देवतरवः वृक्षविशेषाः येन स पुनः किंभूतो वायुः भिन्नशिखंडिबर्हः भिन्नाः भेदिताः शि
खंडिनां मयूराणां बर्हाः कलाः येन सः किंभूतैः किरातैः अन्विष्टमृगैः अन्विष्टाः दृष्टाः मृगाः हरिणाः यैस्तैः १५ वि

भागीरथीनिर्झरशीकराणां वोढा मुहुः कंपितदेवदारुः यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशि
खंडिबर्हः १५ सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिवर्तमानः पद्मानि यस्याग्रसरोरुहा
णि प्रबोधयत्यूर्द्ध्वमुखैर्मयूखैः १६

वस्वान् सूर्यः यस्य हिमालयस्य पद्मानि कमलानि प्रबोधयति प्रकाशयति कैः मयूखैः रश्मिभिः किंभूतैः मयूखैः ऊ
र्द्ध्वमुखैः ऊर्द्ध्वानि उन्नतानि मुखान्याननानि येषां तैस्तैः किंभूतो विवस्वान् अधः परिवर्तमानः विवर्तमानः किंभूता
नि पद्मानि सप्तर्षिहस्तावचितावशेषाणि सप्तर्षीणां हस्ताः करास्तैरवचितानि गृहीतानि कमलानि तेभ्योऽवशे
षाणि रहितानि पुनः किंभूतानि पद्मानि अग्रसरोरुहाणि अग्रेऽपित्यकार्याण्यानि सरांसि तेभ्यो रुहाणि उत्पन्नानि १६

ऊमा. प्रजापतिर्ब्रह्मा यस्य हिमालयस्य शैलाधिपत्यं पर्वताधिराजभावं स्वयं निजं अन्वतिष्ठत् ददौ किंभूतं शैलाधिपत्यं क
टी. ल्पितयज्ञभागं कल्पितः रचितः यज्ञभागः यज्ञांशः यस्मिन् तत् किं कृत्वा यस्य हिमालयस्य सारं पराक्रमं धरित्रीध
५ रिणक्षमं धरित्र्याः पृथिव्याः धरणा पालनं तस्मिन् क्षमः समर्थं तं अवेक्ष्य दृष्ट्वा पुनः किंभूतं शैलाधिपत्यं यज्ञांगयोनि
त्वं यज्ञस्य इज्यस्य अंगानि रत्नादिकानि तेषां योनित्वं यस्मिन् तत् १७ सः हिमालयः मेनां नाम्नीं कन्यां विधिना शास्त्रो

यज्ञांगयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च प्रजापतिं कल्पितयज्ञभागं शैलाधिपत्यं स्वयम
न्वतिष्ठत् १७ स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः मेनां मुनीनामपि माननी
यामात्मानुरूपां विधिनोपयेमे १८

क्तप्रकारेण उपयेमे विवाहयामास कस्यै कुलस्य स्थितये वंशस्य विभूतये किं
भूतां मेनां पितॄणां कन्यां दिव्यपितॄणां पुत्रीं पुनः किंभूतां मेनां मुनीनां ऋषीणाम् अपि माननीयां मान्यां योग्यां पुनः किं
भूतां मेनां आत्मानुरूपां आत्मनानुरूपा सदृशी तां पुनः किंभूतां मेनां पितॄणां मानसीं चित्तोद्भवां किंभूतः सः मेरुसखः मे
रुपर्वत एव सखा मित्रं यस्य सः पुनः किंभूतः सः स्थितिज्ञः स्थितिं जानातीति सः १८ अथानंतरं भूधरराजप० ॥ ५

त्याः मेनायागर्भः भवत् दोहदोः भवत् कस्मिन् सति कालक्रमेण समयप्रवर्त्तनेन तयोः हिमालमेनयोः
सुरतप्रसंगे सुरतस्य संभोगस्य प्रसंगः संयोगः तस्मिन् प्रवृत्ते याते सति किंभूते सुरतप्रसंगे स्वरूपयोग्ये स्वरूपस्य
निजरूपस्य योग्यः सदृशे तस्मिन् किंभूतायाः भूधरराजपत्न्याः यौवनमुद्वहंत्याः यौवनं दधत्याः किंभूतं यौवनं
मनोरमं कांतम् १९ सा मैनाकं नाम पुत्रं सुतः जीजनत् किंभूतं मैनाकं वृत्रशत्रौ पुरंदरे सति इंद्रे तस्मै सति अभो

कालक्रमेणाथ तयोः प्रवृत्ते स्वरूपयोग्ये सुरतप्रसंगे मनोरमं यौवनमुद्वहंत्या गर्भो भवद्भू-
धरराजपत्न्याः १९ असूत सा नागवधूपभोग्यं मैनाकमंभोनिधिबद्धसख्यं क्रुद्धेपि पक्ष-
च्छिदि वृत्रशत्राववेदनाज्ञं कुलिशक्षतानां २०

निधिबद्धसख्यं अंभोनिधिसमुद्रेण सह बद्धं कृतसख्यं मित्रत्वं येन स तं किंभूते वृत्रशत्रौ परिच्छिदि पक्षान् प
क्षान् छिनत्तीति स तस्मिन् पुनः किंभूतं मैनाकं नागवधूपभोग्यं नागानां सर्पाणां वध्वः स्त्रियस्ताभिरुपभो
ग्यः तं पुनः किंभूतं मैनाकं कुलिशक्षतानां कुलिशेन वज्रेण क्षताः प्रहारिताः ये पर्वताः तेषां अवेदनाज्ञं

कुमा० टी० १०

कुमा. टी. ६

अपमानानंतरं दक्षस्य कन्या पुत्री तां शैलवधूं हिमालयपत्नीं प्रपेदे जगाम कस्मै जन्मने उत्पत्तये किंभूता क
न्या पितुः दक्षस्य प्रजापतेः अपमानेन तिरस्कारेण प्रयुक्ता योजिता पुनः किंभूता कन्या भवपूर्वपत्नी भवस्य म
हेश्वरस्य पूर्वं या पत्नी स्त्री पुनः किंभूता कन्या सती पतिव्रता पुनः किंभूता कन्या सती योगविसृष्टदेहा सती तां अ

अथायमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी सती सती योगविसृष्टदेहा तां जन्म
ने शैलवधूं प्रपेदे २१ सा भूधराणामधिपेन तस्यां समाधिवत्यामुदपादि भव्या सम्यक्प्र
योगादपरिक्षितायां नीताविवोत्साहगुणेन संपत् २२ ॥

ग्रोजीवच्छरीरज्जुरहवतीनां योगेन धर्मेण विसृष्टः त्यक्तः देहः शरीरः यया सा २१ भूधराणामधिपेन पर्व
तानां अधिपतिना तस्यां मेनायां सा कन्या उदपादि उत्पादयांचक्रे किंभूतायां तस्यां समाधिवत्यां किंभूता सा
भव्या रम्या केन का कस्यामिव उत्साहगुणेन उल्लासेन नीतौ न्याये संपत् लक्ष्मीरिव किंभूतायां नीतौ सम्यक्
प्रयोगात् सम्यङ्नयात् रक्षितायां पालितायामपि २२ ॥ ६

तज्जन्मदिनंतस्याःकुमार्य्याःजन्मउत्पत्तिस्तस्यदिनंशरीरिणांदेहभृतांसुखायआनंदायबभूवासीत् किंकिंभू
तं तज्जन्मदिनंप्रसन्नेदिकःप्रसन्नाःनिर्मलाःदिशःककुभःयस्मिन् ततःपुनःकीदृशंतज्जन्मदिनंयासुविक्रि
वातयांसुनाधूलिनाविक्षरहितेवातेपवनःयस्मिन्ततःपुनःकिंभूतेतज्जन्मदिनेशंखस्वनानंतरंपुष्पवृष्टिशं
खालाजानांस्वनःशब्दस्तस्मात्अनंतरंपुष्पानांप्रसूनानांवृष्टिवर्षःयस्मिन्ततःकिंभूतानांशरीरिणांस्थावरजं

प्रसन्नदिक्पांसुविविक्तवातंशंखस्वनानंतरपुष्पवृष्टि शरीरिणांस्थावरजंगमानांसुखाय
तज्जन्मदिनंबभूव २३ तयादुहित्रासुतरांसवित्रीस्फुरत्प्रभामंडलयाचकासे वैडूर्यभूमिर्न
वमेघशब्दादुद्भिन्नयारत्नशलाकयेव २४

गमानांस्थावराःस्थितास्तुपुनःजंगमाश्चलास्तेषां २३ सावित्रीजननीमेनातयादुहित्रापुत्र्यासुतरांचका
सेऽतिशयेनबभौकिंभूतयातयास्फुरत्प्रभामंडलयास्फुरन्प्रकाशनप्रभायाःकान्त्याःमंडलःपरिवेशःय
स्याःसातयाकयाकेवरत्नशलाकयारत्नानांमणीनांशलाकयावैडूर्यभूमिरिवमणिमेदिनीवकिंभूतया
तयारत्नशलाकयाकस्मात्नवमेघशब्दात्नवःनूतनःमेघानांघनानांशब्दस्तस्मात्उद्भिन्नयाभेदंप्राप्तया २४

कुमा॰
टी॰
८

साकुमारीविशेषान् अंगविशेषान्पुपोषपुपुषेकिंभूतासादिनेदिनेपरिवर्द्धमानाप्रत्यहंप्रथमानाल।
ब्धोदयाकेवचांद्रमसिलेखेवचांद्रीरेखेवकिंभूतान्विशेषान्लावन्यमयान्सौंदर्यमयान्विशेषान्कानी
वकलांतराणीवअन्यकलानीवकिंभूतानिकलांतराणिज्योत्स्नांतराणिज्योत्स्नावचंद्रिकेवांतरेमध्येयेषांता

दिनेदिनेसापरिवर्द्धमानालब्धोदयाचांद्रमसीवलेखा पुपोषलावन्यमयान्विशे
षान्ज्योत्स्नांतराणीवकलांतराणि २५ तांपार्वतीत्यभिजनेननाम्नाबंधुप्रियां
बंधुजनोजुहाव उमेतिमात्रातपसेनिषिद्धापश्चादुमाख्यांसुमुखीजगाम २६

नि २५ बंधुजनःकुटुंबिसमूहःतांकन्यांनाम्नाःअभिधेयेनइतिजुहावइत्याह इतिकिंपार्वतीनाम्नापर्वतीकिं
भूतेननाम्नाअभिजनेनमनोहरेणकिंभूतांतांबंधुप्रियांबंधूनांमैनकादीनांप्रियादयितातांपश्चात्साउमाख्यांजगा
मउमानामजगामप्रापकिंभूतासामात्रामेनयातपसेइतिनिषिद्धाइतिविमुखीकृताइतिकिंउमावत्सेपार्वतितवमा

८ यादित्युक्तकारणात्उमाख्यांजगामेत्यर्थः
२६

महीभृतः हिमालयस्य दृष्टिः अभिलाषात् तस्मिन् अपत्ये पार्वतीरूपे तृप्तिं न जगाम पूर्णतां न प्राप किंभूतस्य महीभृतः पुत्र
वतोपि संततिमतोपि कस्य का कस्मिन्निव मधोर्वसंतस्य द्विरेफमाला भ्रमरपंक्तिः चूतेनेव आम्रवृक्षेणेव किंभूतस्य मधोः
अनंतपुष्पस्य अनंतान्यनेकानि पुष्पाणि प्रसूनानि यस्य तस्य किंभूता द्विरेफमाला सविशेषसंगा विशेषः विशेषेण
सह वर्त्तमानः संगाः प्रसंगाः यस्याः सा २७ सः हिमालयः तया पार्वत्या पूतः पवित्रः आसीत् च पुनः विभूषितः मनोहरो बभू

महीभृतः पुत्रवतोपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिं अनंतपुष्पस्य मधोर्हि चूते द्विरेफमाला सवि
शेषसंगा २७ प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः संस्कारवत्येव गिरा मनीषी
तया स पूतश्च विभूषितश्च २८

व किंभूतः सः मनीषी बुद्धिमान् कया का इव गिरा सरस्वत्या मनीषी बुद्धिमानिव किंभूतया गिरा संस्कारवत्या पुनः कया क
इव शिखया दीपार्चिषः दीपः प्रदीप इव किंभूतया शिखया प्रभामहत्या प्रभायाः कांत्याः महती बहुला तया पुनः कया
क इव त्रिमार्गया त्रयः मार्गाः पंथानः यस्याः सा तया गंगया त्रिदिवस्य मार्ग इव स्वर्गस्य पंथा इव २८

सापार्वती मुहुः वारंवारं रेमे विक्रीडकाभिः मंदाकिनीसेकतवेदिकाभिः मंदाकिन्याः गंगायाः सैकतंतटंयस्मिनयाः वे
दिकास्ताभिः पुनः कैः कंदुकैः च पुनः कृत्रिमगुडीयापुत्रैः कृत्रिमाश्चामीपुत्रकाः स्तनास्तैः किंभूता सासखीनामध्यगता
सहचरीणांमध्यंप्राप्ताः साकिंभूतेव वाल्येवाल्यावस्थायां क्रीडरसं निर्विसतीव क्रीडाविलासं विशतीव २९ प्राक्तनेजन्म
विद्याः प्राक्तने पूर्वभवे जन्मोपत्तिस्तस्य विद्याः उपदेशकालेउपदेशसमये तां पार्वतीं प्रपेदिरे प्रापुः किंभूतां तां स्थिरोपदे।

मंदाकिनीसैकतवेदिकाभिः साकंदुकैः कृत्रिमपुत्रकैश्च रेमे
मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव वाल्ये २९ तां हंस
मालाः शरदीव गंगां महौषधीं नक्तमिवात्मभासः स्थिरोपदेशा
मुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ३० ॥

शो स्थिरः निश्चलः उपदेशः ज्ञानः यस्याः सा तां कां कस्मिन्निव हंस
मालाः हंसानां मरालानां मालाः पंक्तयः शारदि शरदृतौ गंगां मंदाकिनीं व पुनः काः कस्यां कामिव आत्मभासः आत्म
ज्युतयः नक्तं रात्रौ महौषधीरिव दिव्यौषधीरिव ३० ॥

अथानंतरं सा पार्वती बाल्यात्परं बाल्यावस्थायाः परं वयः प्रपेदे यौवनं प्राप किंभूतं वयः असंभृतं अनाख्चितं पुनः
कथंभूतं वपुः अंगयष्टेः शरीरस्य मंडनं शृंगारं पुनः किंभूतं वयः अनासवाख्यं मदरहितनाम पुनः किंभूतं वयः मदस्य
कारणं कामस्य हेतु पुनः किंभूतं वयः कामस्य अस्त्रं मदनस्य शस्त्रं किंभूतं अस्त्रं पुष्पव्यतिरिक्तं पुष्पात् अस्त्रं नाव्यतिरि
क्तं भिन्नं ३१ तस्याः पार्वत्याः वपुः शरीरं नवयौवनेन नूतनयौवनेन विभक्तं बभूव भिन्नमासीत् किंभूतं वपुः चतुरस्र

असंभृतं मंडनमंगयष्टेरनासवाख्यं करणं मदस्य कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ व
यः प्रपेदे ३१ उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविंदं बभूव तस्याश्चतुरस्रशोभि
वपुर्विभक्तं नवयौवनेन ३२ ॥

स्रशोभि चतुर्भिरस्रैः प्रदेशैः शोभ्यते तत् वपुः किंभूतं इव तूलिकया लेखिन्या चित्रं उन्मीलितमिव मूर्तिमालिखित
मिव पुनः किंभूतमिव अरविंदमिव सूर्योदयकमलमिव किंभूतं अरविंदं सूर्यां
शुभिः सूर्यरश्मिभिर्भिन्नं प्रकाशितं ३२ ॥

उमा. तच्चरणौ तस्याः पार्वत्याः पादौ स्थलारविंदश्रियं स्थले जलवर्जितभूमौ अरविंदानि कमलानि तेषां श्री शोभा तां आज
टी० ह्रतुः आहरतां कस्मात् पृथिव्यां भूमौ निक्षेपणात् स्थापणात् किंभूत मिव रागं रंगं उद्गिरंतामिव काभिः अभ्युन्नताः भि
९ न्नाः अंगुष्ठानामंगुलीनां नखास्तेषां प्रभाः कांत्याः ताभिः किंभूतां स्थलारविंदश्रियं अव्यवस्थां संचारिणी २३ दा

अभ्युन्नतांगुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरंतौ आजह्रतुस्तच्चरणौ पृथिव्यां स्थलारविंदश्रिय
मव्यवस्थां ३३ सा राजहंसैरिव संनतांगी गतेषु लीलांचितविभ्रमेषु व्यनीयत प्रत्युपदेशलुब्धैरादि
त्सुभिर्नूपुरसिंजितानि ३४ ॥

जहंसैर्मरामलैः सा पार्वती व्यनीयत विनयप्रापयामासेव किंभूतैः राजहंसैः नू
पुरसिंजितानि नूपुराणां मंजरीणां सिंजितानि शब्दानि आदित्सुभिः जिघृक्षद्भिस्तैः पुनः किंभूतैः राजहंसैः प्रत्युपा
देशलुब्धैः प्रत्युपदेशो लब्धाः लोभितास्तैः किंभूता सा गतेषु गमनेषु संनतांगी संनतानि नमानि अंगानि गात्राणि
यस्याः सा किंभूतेषु तेषु लीलांचितविभ्रमेषु लीलया क्रीडया अंचिताः मनोहराः विलासाः येषु तेषु ३४ ॥ ॥ ९

विधातुः ब्रह्मणः सः यत्नः शोभांगनिर्माणविधौ शोभाणि रहितानि अंगानि गात्राणि येषां निर्माणं रचनं तस्य
विधानं नामेव विधातुः ब्रह्मणः यत्नः तदीये पार्श्वतये जंघे यत्नः आसाव भूव किंभूतस्य विधातुः सृष्टुवतः सृष्टि
कर्तुः किंभूते जंघे वृत्तानुपूर्वे अनुपूर्वे वृत्तः सरसस्तस्मिन् पुनः किंभूते जंघे शुभे श्रेष्ठे पुनः किंभूते जंघे लावण्ये
मनोहरे पुनः किंभूते जंघे उत्पाद्य उत्पादितं येग पस्तस्मिन् पुनः किंभूते जंघे नातिदीर्घे अनिशायेन संघाटे ३४ नागें

नागेंद्रहस्तास्त्वचि कर्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापि लोके परिणाहि रूपं जातास्तदू
र्वोरुपमानबाह्याः ३५ वृत्तानुपूर्वे च न चातिदीर्घे जंघे शुभे सृष्टवतस्तदीये शोभांगनिर्माणविधौ विधा
तुर्लावण्य उत्पाद्य इवास यत्नः ३४ ॥

द्रहस्ताः करिशुंडास्तु पुनः कदलीविशेषाः रंभाः तदूर्वोः तस्याः पा
र्वत्याः जघनयोरुपमानबाह्याः जाताः भिन्नाः जाताः किं कृत्वापि लोके परिणाहरूपं स्तन्यरूपं लब्ध्वाप्यपि
गम्यापि नागेंद्रहस्ताः कस्मात् त्वचि कर्कशत्वात् चर्मणि कठोरत्वात् कदलीविशेषाः कस्मात् एकांतशैत्यात्
एकांतनिश्चयेन शैत्यात् शीतलत्वात् तदूर्वोः एतौ दोषौ न स्तः एतौ कौ कर्कशशीतलौ विपर्ययः ३५ ॥

ऊमा. तस्याः पार्श्वस्याः तन्नकांचीगुणस्थानंकांच्याः त्लद्रवंदिकायाः गुणानितेषांस्थानं एतावतापतस्प्रमाणेन अनुमेय
टी॰ शोभि अनुमेवा अनुमानयितं शोभाकांति यस्यईदृकनवभूव किंभूतायाः तस्याः अनिंदितायाः निंदारहितायाः त
१० त् किंकांचीगुणस्थानं गिरिशेन शिवेन यत्कांचीगुणस्थानं पश्चात्पूर्वं अंकमारोपितं तउत्संगं स्थापितं किंभूतमंक
अनन्यनारीकमनीयं नअन्यनार्याः अपरस्त्रियः कमनीयं अन्यस्त्रीभिः प्राप्तुमशाक्यमित्यर्थः ३७ तस्याः पार्श्व

एतावतानन्वनुमेयशोभिकांचीगुणस्थानमनिंदितायाः आरोपितं यद्गिरिशेन पश्चादनन्यनारीक
मनीयमंकं ३७ तस्याः प्रविष्टानतनाभिरंध्रंरराजतन्वीनवरोमराजिः नीवीमतीक्रम्यसितेतरस्यत
न्मेषलामध्यमणेरिवार्चिः ३८
स्याः नवरोमराजिः नवानूतनारोमा णांराजिः पंक्तिः रराजवभौ किंभूतानवरोमराजिं ऊ॰
नतनाभिरंध्रं नताभिन्नाः नाभेः रंध्रं छिद्रं तत्प्रविष्टाप्रवेशिता किंकृत्वा नीवीकटवस्त्रसूत्रमतिक्रम्य उल्लंघ्य पुनः टी॰
किंभूताः नवरोमराजितः तन्वीसूक्ष्मानवराजिः किमिवतन्मेखलानध्यमणेः तस्याः पार्श्वस्याः मेखलाकांचीतस्य
मध्ये अभ्यंतरे योमणिः रत्नंतस्याचिंरिव किंभूतस्यतन्मेखलामणेः सितेतरस्य सितात श्वेतादितरः अन्यतस्य श्यामस्य १०

सापार्वतीमध्येनकटेनवलित्रयवलीनांकुटिलानांत्रयंबभारदधौकिंभूतंवलित्रयंचारुमनोहरंकिंभूतासा
वेदिविलग्नमध्यादिहिलग्नःसंलग्नःमध्यःकटःयस्याःसापुनःकिंभूतासाबालाकुमारीवलित्रयंकिमिवका
मस्यसोपानमिवमदनस्यपुरंध्राणामिवकिंभूतंसोपानंनवयौवनेननूतनवयसाप्रयुक्तंयोजितंआरोहणार्थंप्रापणा
र्थे २९ तदीयंपाणिद्वयंपार्वत्याहस्तद्वयंप्रदोषेरात्रौव्योम्नःशोभांआकाशस्यकांतिंविफलीचकारतिरस्चका

मध्येनसावेदिविलग्नमध्यावलित्रयंचारुबभारबाला आरोहणार्थंनवयौवनेनकामस्यसोपानमिव
प्रयुक्तं २९ निर्भर्त्सिताशोकलताप्रसूनंपाणिद्वयंचारुनखंवनदीयं नवोदितेंदुप्रतिमस्यशोभांव्यो
म्नःप्रदोषेविफलीचकार ३० ॥

रकिंभूतस्यव्योम्नःनवोदितेंदुप्रतिमस्यनवानूतनाउदिताप्रकाशितायाइंदोश्चंद्रस्यप्रतिमामूर्तिर्यस्यतत्तस्य
किंभूतंपाणिद्वयंनिर्भर्त्सिताशोकलताप्रसूनंनिर्भर्त्सितातिरस्कृताअशोकस्यवृक्षस्यलतावल्लीतस्याः।
प्रसूनंपुष्पंयेनतत्तत्पुनःकिंभूतंपाणिद्वयंचारुनखंचारवःमनोहराःनखाःकरांगुजाःयस्मिन्तत् ३० ॥

कुमा. तस्याः पार्वत्याः स्तनद्वयं कुचयुग्मं तथा तेन प्रकारेण प्रवृद्धं बभूव पयितं आसीत् तथा कथं यथा येन प्रकारेण स्त
टी. तस्य स्तनद्वयस्य मृणालसूत्रांतरमपि मृणालस्य पद्मबीजस्य सूत्रं तंतुः तस्यांतरे आवेशं अलभ्यं बभूव अगम्यं आसीत्
११ किंभूतस्य तस्य श्यामामुखस्य श्यामं नीलं मुखमाननं यस्य तस्य किंभूतं स्तनद्वयं अन्योन्यमुत्पीडयत् परस्परं सं

अन्योन्यमुत्पीडयदुत्पलाक्ष्याः स्तनद्वयं पांडु तथा प्रवृद्धं मध्ये यथा श्याम
मुखस्य तस्य मृणालसूत्रांतरमप्यलभ्यं ४२ शरीषपुष्पाधिकसौकुमा
र्यौ बाहू तदीयाविति मे विषादः पराजितेनापि कृतौ हरस्य यौ कंठपाशौ म
करध्वजेन ४२ ॥

उदयत् पुनः किंभूतं स्तनद्वयं पांडु गौरं किंभूतायाः तस्याः उत्पलाक्ष्याः उत्पलवत् कमलवत् अक्षिणी नेत्रे यस्याः
सा तस्याः ४२ मे मम इति विषादो स्ति इदृक्षो स्ति इति किं तौ तदीयौ बाहू पार्वत्या भुजौ शरीषपुष्पाधिकसौकुमार्यौ
स्तः शरीषस्य वृक्षविशेषस्य पुष्पं प्रसूनं तस्मादधिकसौकुमार्यं विशेषकुसुमत्वं ययोः स्तः तौ तादृशौ बाहू यौ बाहू तेन
मकरध्वजेन कामदेवेन हरस्य शिवस्य पाशौ कृतौ गलबंधनौ विहितौ किंभूतेन मकरध्वजेन पराजितेनापि जितेना

॥ पि इति ईदृशौ कोमलौ भुजौ शिवस्य कंठपाशे
११ कंठ भविष्यतः इति विषादो स्त्रोत्यर्थः ४२ ॥

तस्याः पार्वत्याः कंठस्य गलस्य च पुनः मुक्ताकलापस्य मौक्तिकमालस्य भूषणभूष्यभावाः भूषणैः अलं
करः च पुनः भूषस्य अलंकृतस्य भावः साधारणो बभूव तत्स्यो ऽभूत् कस्मात् अन्योन्यशोभाजननात् अन्यो
न्यपरस्परं शोभा कीर्तिः तस्या जननं प्रकटीभवनं तस्मात् किंभूतस्य कंठस्य स्तनवंधुरस्य स्तनाभ्यां कुचाभ्यां
वंधुरः मनोहरस्य किंभूतस्य मुक्ताकलापस्य निस्तुल्यस्य कंठम मुक्ताफलहारः मनोहरो दृश्यते मुक्ताकला

कंठस्य तस्याः स्तनवंधुरस्य मुक्ताकलापस्य च निस्तुलस्य अन्योन्यशोभाजननाद्बभूव साधार
णो भूषणभूष्यभावः ४२ चंद्रं गता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां उमामुखं
तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ४३

येन कंठः मनोहरो दृश्यते इति भूषणभूष्यभावाः साधारणो इत्यर्थः ४२ लक्ष्मीः श्रीः चंद्रं गता शशिनं प्रा
प्ता सती पद्मगुणान् कमलगुणान्न भुंक्ते न भुनक्ति लक्ष्मीः पद्माश्रिता सती कमलाश्रिता सती चांद्रमसीम् अभि
ख्यां चांद्रान्गुणान्न भुंक्ते लक्ष्मीः द्विसंश्रयां प्रीतिं उभयाश्रितां रतिम् अवाप प्राप किं कृत्वा उमामुखं प्रतिपद्य
पार्वतीवदनं प्राप्य किंभूता लक्ष्मीः लोला चपला ४३

कुमा. पुष्पंप्रसूनंयदिप्रवालोपहितंप्रवालेननवपल्लवेनोपहितंसंयुक्तंस्यात्भवेत्वाअथवातथेयदिमुक्ताफलंमुक्तिजं
टी. स्फुटविद्रुमस्थंस्फुटःविद्रुमःगुलिकास्थितंस्यात्ततस्तस्मादनंतरंतस्याःपार्वत्याःस्मितस्यविशदस्यगौरस्यपु
नःकिंभूतस्यस्मितस्यताम्रौष्ठपर्यस्तरुचःताम्रौरक्तौओष्ठौओष्ठाधरौतयोःपर्यस्तायतितेरुक्कांतिर्यस्यसतस्य ४५
१२ अन्यपुष्टापिकोकिलापिवितंत्रीरिववाणेवआसीत्कस्यांकस्यांसत्यांतस्यांपार्वत्यांप्रजल्पितायांकथितायांवा

पुष्पंप्रवालोपहितंयदिस्यान्मुक्ताफलंवास्फुटविद्रुमस्थं ततोनुकुर्याद्विशदस्यत
स्यास्ताम्रौष्ठपर्यस्तरुचःस्मितस्य ४५ स्वरेणतस्याममृतस्रुतेवप्रजल्पितायाम
भिजातवाचि अप्यन्यपुष्टाप्रतिकूलशब्दाश्रोतुर्वितंत्रीरिवताड्यमाना ४६ ॥

सत्यांकिंभूतासाअन्यपुष्टाप्रतिकूलशब्दाप्रतिकूलंहितंशब्दंस्वनंयस्याःसाईदृश्यापिकिंभूतावितंत्री
ताड्यमानाताडनाआहन्यमानाकिंभूतायांतस्यांअभिजातवाचिअभिजातासुंदरीवाक्वाणीयस्याःसातस्यां
अन्यपुष्टाकेवश्रोतुःश्रवणकर्तुःजीवस्यस्वरेणशब्देनअमृतस्रुतेवपीयूषवर्षिणेवईदृश्यांसत्यामपिपार्व
त्याःतुल्यशब्दानबभूवेत्यर्थः ४६ ॥ १२

न्वित्यास्थैर्येन यापार्वत्या अधीरविप्रेक्षितं चपलावलोकनं मृगांगनाभ्यः हरिणीभ्यः गृहीतं आनं न्वित्यास्थैर्येवा
मृगांगनाभिः ततः पार्वत्याः गृहीतमानं इति विभ्रमं किंभूतया तया आयतनात्याः आयते विस्तारिते अक्षिणी नेत्रे
यस्याः सा तया किंभूतं अधीरविप्रेक्षितं प्रवातनीलोत्पलनिर्विशेषं प्रभातवातुवन्नीलोत्पले पद्मकमलं तेन
विशेषः तुल्यं ४७ अनंगः कामदेवः इदं स्वचापसौंदर्यं स्वस्यात्मीयस्य चापस्य धनुषः सौंदर्यं मनोहरत्वं मो

प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या तयागृहीतं नु मृगांगनाभ्यस्ततोगृहीतं
नु मृगांगनाभिः ४७ तस्याः शलाकांजननिर्मितेव कांतिर्भ्रुवोरायतलेखयोर्या तां वीक्ष्य लीलाच
तुरामनंगः स्वचापसौंदर्यमदं मुमोच ४८ ॥

च त्याज किं कृत्वा तस्याः पार्वत्याः भ्रुवोः तां कांतिं शोभां वीक्ष्य दृष्ट्वा किंभूतां तां लीलाचतुरां लीलया क्रीड
याच तुराऊ शलाकां तां तां कांतिं या कांतिः शलाकांजनेन निर्मितेव दर्पणे अंजनशलाकया रचितेव दर्पणे
किंभूतयोः भ्रुवोः आयता विस्तृता लेखा रेखा ययोस्ते तयोः ४८ ॥

तिरश्चांचेतसियत्नंमनसियदिलज्जास्यांततोभवेत्‌तदाचमर्यःवन्याःगावःवालप्रियत्वंपुच्छरोमप्रियत्वंशि
थलंकुर्युःकिंकृत्वअसंशयंयथास्यात्तथापर्वतराजपुत्र्याःहिमालयदुहितुःतंकेशपाशंशिरोरुहसमूहंप्रस
मीक्ष्यदृष्ट्वापार्वत्याःकेशपाशःचमरीणांकेशेभ्याःधिकोवभूवेत्यर्थः ४९ विश्वसृजाब्रह्मणासापार्वतीप्रय

लज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराजपुत्र्याः तंकेशपाशंप्रसमीक्ष्यकुर्युःवालप्रियत्वंशि
थिलंचमर्यः ४९ सर्वोपमाद्रव्यसमुच्चयेनयथाप्रदेशंविनिवेशितेन सानिर्मिताविश्वसृजाप्रय
त्नादेकस्थसौंदर्यदिदृक्षयेव ५०

त्नापत्नात्‌निर्मितारचिताकेनसर्वोपमाद्र व्यसमुच्चयेनसर्वाःसंपूर्णाश्चा
रूरूपमाःशोभास्तापवद्द्रव्याणियत्नानितेषांसमुच्चयःसमूहस्तेनकिंभूतेनसर्वोपमाद्रव्यसमुच्चयेनयः
याप्रदेशंयथाविनिवेशितेनस्थापितेनकयेवएकस्यसौंदर्यंदिदृक्षयेवएकस्यएकत्रीभूतस्यसौंदर्यंत
स्यदिदृक्षयेवद्रष्टुमिच्छयेव ५०

कदाचिन्नारदः मुनी किलेति सत्येइति समादिदेश आज्ञापयामास किंकृत्य तांकन्यां पार्वतीं पितुः समीपे
हिमालयस्य निकटे प्रेक्ष्य दृष्ट्वा किंभूतां तांकन्यां हरस्य शिवस्य एकवधूं भवित्रीं मुख्यपत्नीं भविष्यंतीं पुनः किं
भूतां कन्यां प्रेम्णा स्नेहेन शरीरार्द्धहरां शरीरस्य देहस्यार्द्धं हरतीति सा तां देहार्द्धभाजं किंभूतः नारदः कामचरः
कामेन स्वेच्छया चरतीति सः स्वेच्छयाचारीत्यर्थः ५१ अतोऽस्मात्कारणात् अस्याः पार्वत्याः गुरुः पितातस्थौ

तां नारदः कामचरः कदाचित्कन्यां किल प्रेक्ष्य पितुः समीपे समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरा
र्द्धहरां हरस्य ५१ गुरुः प्रगल्भेपि वयस्यतोस्यास्तस्थौ निवृत्तान्यवराभिलाषः ऋते कृशानोर्न हि
मंत्रपूतमर्हंति तेजांस्यपराणि हव्यं ५२ ॥

स्थितवान् किंभूतो गुरुः निवृत्तान्यवराभिलाषः निवृत्तो दूरीभूतो अन्यवरस्य अन्यपतेरभिलाषो वांछा यस्य
सः कस्मिन्सति अस्य नारदस्य वचसि प्रगल्भे सति वचने उच्चरिते सति हीति निश्चयेन कृशानोर्ऋते अग्निं विना
अपराणि तेजांसि अन्यानि तेजांसि हव्यं द्रव्यं अर्हंति न योग्यानि किंभूतं हव्यं मंत्रपूतं मंत्रैः पूतः पवित्रस्तं ५२ ॥

कुमा. अद्रिः हिमवान देवदेवं शिवं न शशाक नोत्सहे किं कर्तुं सुतां पार्वतीं ग्राहयितुं आदापयितुं किंभूतं देवदेवं अया
टी. चितारं अयाचमानं याचारहितमित्यर्थः हि यस्मात्कारणात्साधुः सज्जनः मध्यस्थमौदासीन्यमवलंबते आश्र
१४ यते कस्मिन् इष्टेऽपि विषये केन अभ्यर्थनाभंगभयेन याचाभंगभीत्येत्यर्थः ५३ सा पार्वती यदा अस्मिन् पूर्वं प्रथमे ज्व

अयाचितारं न हि देवदेवं अद्रिः सुतां ग्राहयितुं शशाक अभ्यर्थनाभंगभयेन साधुर्मध्यस्थमिष्टे
ऽप्यवलंबतेऽर्थे ५३ यदैव पूर्वे ज्वलने शरीरं सा दक्षरोषात्सुदती ससर्ज तदा प्रभृत्येव विमुक्तसंगः
पतिः पशूनामपरिग्रहोऽभूत् ५४

लने अग्नौ शरीरं देहं तत्याज कस्मात् दक्षरोषात् दक्षस्य पितुः रोषः क्रोधः त
स्मात् किंभूता सा सुदती देवी तदा तस्मिन् काले एव पशूनां पतिः एव पशूनां पतिः शिवः अपरिगृहोऽभूत् न परिग्र
हः गृहस्थः यस्य सः दृशो बभूव किंभूतः पशूनां पतिः प्रभृत्येव विमुक्तसंगः विमुक्तस्त्यक्तः संगः येन सः ५४ ॥ १४

समद्रेष्वरः तपसेतपोनिमित्तायहिमाद्रेः प्रस्थंहिमालस्योपरिभूमिंअध्युवासनिवासंचकारकिंभूतः सः कृत्ति
वासः कृत्तिगजचर्मैववासवस्त्रंयस्यसः पुनः किंभूतः सः जितात्मावशीकृतः आत्माअंतःकरणंयेनसः किंभू
तंप्रस्थंगंगाप्रवाहोक्षितदेवदारुंगंगायाः मंदाकिन्याः प्रवाहः प्रयातस्तेनउक्षिताः सिक्ताः देवदारवः वृक्षायस्मिन्
स्तंपुनः किंभूतंप्रस्थंमृगनाभिगंधिमृगनाभिनाकस्तूर्यागंधवत्पुनः किंभूतंप्रस्थंकिंचित्क्वणत्किन्नरं

सकृत्तिवासास्तपसेजितात्मागंगाप्रवाहोक्षितदेवदारुं प्रस्थंहिमाद्रेर्मृगनाभिगंधिकिंचित्क्वण
त्किन्नरमध्युवास ५९ गणानमेरुप्रसवावतंसाभूर्जत्वचः स्पर्शवतीर्वसानाः मनःशिलाविच्छुरिता
निषेदुः शैलेयनद्धेषुशिलातलेषु ५६

किंचित्क्वणंतः शब्दायमानाः किन्नराः किंपुरुषायस्मिंस्तत् ५५ गणानंदिप्रभृतयः शिलातलेषुनिषेदुः
आसीनाः किंभूताः नमेरुप्रसवावतंसाः नमेरुणांवृक्षाणांप्रसवाः पुष्पाण्येवावतंसाः कर्णभूषणानि येषांतेपु
नः किंभूताः गणाः भूर्जत्वचः वसनाः दधानाः किंभूताः भूर्जत्वचः स्पर्शवतीकोमलाः पुनः किंभूताः मनःशिलाः
विच्छुरिताः मनःशिलायाविच्छुरिताः अनुलिप्ताः किंभूतेषुशिलातलेषुशैलेयनद्धेषुशैलेयेनशैवलेननद्धा

कुमारटीका ५७

कु.मा. ककुद्मान् वृषभः नंदिगणः उन्ननाद उच्चशब्दं चकार किं कुर्वन्सन् खुराग्रैः तुषारसंघातशिलाः तुषा
टी. रस्य हिमस्य संघातः समूहस्तस्य शिलास्ताः समुल्लिखन् उल्लिखन्सन् किंभूतः ककुद्मान् दर्पकलः दर्पस्य ग
१५ र्वस्य कलाः अंशाः यस्मिन्सः पुनः किंभूतः ककुद्मान् कथंचित् महता कष्टेन गवयैः मृगैः दृष्टः ईक्षितः
किंभूतैः गवयैः विविग्नैः भीषणैः पुनः किंभूतः ककुद्मान् असोढसिंहध्वनिः असोढः असहः सिंहस्य केस

तुषारसंघातशिलाः खुराग्रैः समुल्लिखन्दर्पकलः ककुद्मान् दृष्टः कथंचिद्गवयैर्विविग्नैरसोढ
सिंहध्वनिरुन्ननाद ५७ तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः स्वयं विधाता तप
सः फलानां केनापि कामेन तपश्चचार ५८

रिणः ध्वनिः शब्दः येन सः ५७ तत्र प्रस्थे अष्टमूर्तिः शिवः केनापि
कामेन तपश्चकार किं कृत्वा अग्निं आधाय समीपे हविर्भुजं स्थाप्य किंभूतं अग्निं समित्समिद्धं समिद्भिः इंधनैः स
मृद्धं मूर्छितं तं पुनः किंभूतं तमग्निं स्वमेव मूर्त्यंतरं आत्मीयमेव प्रतिमांतरं किंभूतः अष्टमूर्तिः तपसो फलानां स्व
यं विधाता पुनस्तस्य फलानां स्वयं विधाता केनचित् हेतुना तपश्चकार इत्यर्थः ५८ ॥ १५

अद्रिनाथः हिमालयः तनूजां पुत्रीं पार्वतीं समादिदेश आज्ञापयामास कस्मै निमित्ताय अस्य शिवस्य महेश्वरस्य
आराधनाय सेवाय किं कृत्य अर्घेण पाद्यार्घेण तं शिवं अर्चयित्वा संपूज्य किंभूतं स्वर्गौकसां अर्चितं देवानां पूज्यं
किंभूतां तनूजां सखीसमेतां सखीभिः समेतां संयुक्तां पुनः किंभूतां तनूजां प्रयतां सावधानां पुनः कथंभूतं तं
अनर्घ्यं अमोल्यं ५९ गिरिशः शिवः तां पार्वतीं अनुमेने न प्रतिषिद्धवान् इत्यभिप्रायः किंभूतां तां समाधेः प्रत्य

अनर्घ्यमर्घेण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा आराधनायास्य सखी
समेतां समादिदेश प्रयतां तनूजां ५९ प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां
गिरिशोऽनुमेने विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ६० ॥

पदेभूतामपि पुनः
र्थिभूतां प्रति
कथंभूतां तां शुश्रूषमाणां शुश्रूषामिच्छतीति शुश्रूषमाणा तां सेव्यमानामित्यर्थः विकारहेतौ सति विकारस्य प्र
कृतेर्हेतौ विषसीसान्निध्यान कारणे सति विद्यमानेऽपि येषां पुंसां चेतांसि न विक्रियन्ते विकृतिं न यन्ते एव धीराः विक्रियन्ते ६०

सापार्वतीप्रत्यहंप्रहन्यहनिगिरीशंशिवंउपचचारशुश्रूषांचक्रे किंभूतासासुकेशीशोभनामूर्द्धजापुनः किं
भूतासाअवचितवलिपुष्पाअवचितानित्रूनानिपुष्पाकुसुमानियया सापुनः किंभूतासावेदिसन्मार्जदक्षा
वेदेः समाधिवेदिकायाः सन्मार्जनेउपस्कारालेपनादिकर्मणिदक्षाचतुरापुनः किंभूतानियमविधिजलानां।

अवचितवलिपुष्पावेदिसन्मार्जदक्षानियमविधिजलानांबर्हिषांचोपनेत्रीगिरिशमुपचचार
प्रत्यहंसासुकेशीनियमितपरिखेदातच्छिरश्चंद्रपादैः ६१ इतिश्रीकुमारसंभवेमहाकाव्ये
कालिदासकृतौउमोत्पत्तिर्नामप्रथमः सर्गः १ शुभम्

स्नानादीनांविधिर्विधानं
तस्यजलानितोयानिते
षांचपुनः बर्हिषांकुशानांउपनेत्रीआनयित्रीपुनः किंभूतासातच्छिरश्चंद्रपादैः तस्यशिवस्यउत्तमांगेयश्चन्द्रः
तस्यपादाः रश्मयस्तैः नियमितपरिखेदानियमिताः दूरीकृताः परिखेदुः कष्टः ययासा ६१ इतिकुमार

130